त् ॐह्रींगर्भायैनमः १२ ह्रींपदा
भिधा ह्रींकारोभिधानामयस्याः
सातथा समहिह्रीरूपायाःसमहि
शब्दवाच्यत्वनियमादित्यभिसंधिः
ॐह्रींपदाभिधायैनमः १३ ह्रींका
रवाच्यांमायोपाधिकब्रह्मणिकल्पि
तधर्मेणाशब्दप्रवृत्त्युपपत्तेः ह्रीं
पदवाच्यारूपार्थाइत्यर्थः ॐह्रीं
कारवाच्यायैनमः १४ ह्रींकारप्र

त्रि॰
वि॰
५२

ज्या मूलमंत्रेण पूजयेदिति पूजांग
त्वेन मूलमनोर्विनियोगः श्रूयते
मूलमनुष्ठदेवतायाः स्वकं नामेति
वचनादेतन्मुखोनामसैव मंत्रशा
स्त्रेष्वनन्तान्यत्वायुत्पन्नत्वात् ह्रींका
रं नमौं तमुच्चार्य यथाशक्ति संप्रदा
यश्रीचक्रादौ मूलदेवतापूजनी
येत्यागमरहस्यात् ह्रींवीजेनैव
पूजितं योग्यता श्रनिष्टिय वीजना
मत्वादित्यभिप्रायः ॐ ह्रींकारमू
र्त्यायै नमः ५५ ह्रींकारपीठिका
सर्वपीठशाहस्राधारलक्षकः वा

ध्यार्थे हि वाचकशब्दस्य सत्प्रद
त्वेनाधारो भवति मंत्रदेवतयो
रभेदेपि अर्थनिष्ठमहिम्नस्तद्वा
चकपदेष्वप्यमानत्वात् कल्पि
नभेदं संपादयेदतुच्यते ह्रींकार
स्य पीठिकाहृतिस्थाने शब्दागो
चरस्थानायां विषयभूतेत्यर्थः
ॐ ह्रींकारपीठिकायै नमः १८ ह्रीं
कारवेद्या स्वरूपतो निर्गुणब्रह्मा
त्मकतया ज्ञानविषयाश्रयत्वा
भामक्षाख्यपुरुषार्थरूपतयासं
सारदशायां प्रतीयमानत्वाद्रूद

त्रि॰ पस्दनश्रवणादिविध्यप्रामाण्प
वि॰ निरासायलक्षणयाप्युद्दस्वरूप
५४ परमानंदतयाभीप्सितत्वाच्छ्रव
59 णादिजन्यवृत्तिव्याप्यत्वरूपवे
दनाविषयत्वेब्रह्मणएवज्ञानना
शायवृत्तिव्याप्तिरपेक्षितेति मा
मेवयेप्रपद्यंतेमायामेतांतरंति
नेत्यादिभगवद्वचनाद्भगवत्पा
दादिभिरंगीकृतत्वामिति ह्रीकारेण
गृहस्थुत्वाच्छ्रुतेनवेदितंयोग्यात
स्वरूपपरिज्ञानद्वारानत्साभिरू
पाम्प्रुषार्थहेतुत्वादितात्पर्यं ॐ

ह्रींकारवेद्यायैनमः ९ ह्रींकार
वित्या अस्य बीजस्य पंचप्रणवो
नगीतत्वेनोंकाराभेदेब्रह्मप्रती
कत्वाविशेषात् प्रणवेपरापर
ब्रह्मोपासनहेतोरस्मिन्वाप्रतीके
नहतीतिविकल्पः यथाभक्तिपा
र्थक्येनमंत्रविशेषेषुभवतीति
योगवेदमार्गरहस्येनवादजस्या
यवकाशः ह्रींकारेउभयविध
ब्रह्मस्वरूपतयाविनिर्देयोगया
ध्यानस्यमानात्माकारप्रत्याहारा
उपकारकत्वेनध्यानत्वेतत्पर्थः

त्रि॰ ॐ ह्रींकाररचित्यायै नमः १८ ह्रींम्

वि॰ हरणमित्यस्यानुपावात् सर्ववि

५५ श्वैश्वर्यप्रदानादिशक्त्यानुपाधि

ष्टानत्वेन सत्यवादाविशेषितप

रमानंदरूपामुक्तिरित्यर्थः ॐ ह्रीं

नमः १५ ह्रीं शरीरिणी मूलमंत्रा

त्मिकेत्यावत् ह्रीमेव शरीरंमू

र्तिरस्याः अस्तीति ह्रीं शरीरिणी ॐ

ह्रीं शरीरिण्यै नमः २ इति श्रीम

त्परमहंसपरिव्राजकाचार्यश्रीम

द्भगवज्जोविंदपूज्यपादशिष्यश्रीम

च्छंकरभगवत्पादकृतायांत्रिशती

नामप्रकाशिकायांह्रींकारनामा
र्थप्रकाशनेनामपंचमेप्रकर
णंसमाप्तं ५ अथद्वितीयकूट
निर्णयं हकाररूपा हकारोरूपे
यद्वर्णावयवोयस्याःसामूलवि
द्यावाच्यार्थवाचकंयस्याःसाजथा
ॐहकाररूपायैनमः १ हलक्षकू
जिता हलंयुगंधरेउतितद्वारय
तीतिहलक्षकवलरामस्तेनपू
जितायानादिनेत्यर्थः ॐहलक्ष
कूजितायैनमः २ हरिणीक्षणा
हरिणाउवईक्षणेवीक्षणंयस्याः

त्रि॰
वि॰
५८

सा तथा श्रुतिसंतोषेण कानराही
तिभावः सर्वेत्र सर्वेदा श्रुतीति वा
भक्तेषु पादरहेतुर्दर्शीन वर्तेतीति वा
ॐ हरिणीलक्षणायै नमः २ हरप्रि
या हरस्य प्रिया शिववल्लभेत्यर्थः
हरः प्रियो यस्याः सेति वा ॐ हरप्रि
यायै नमः ४ हराराध्या हरेणस्व
भर्त्राराध्यारा ध्येत्येयोग्या केवलचिदा
नंदरूपत्वात् ॐ हराराध्यायै नमः
५ हरिब्रह्मेन्द्रसेविता हरीरमेशः
ब्रह्मा वाणीशः इंद्रो देवेशः उपलक्ष
णं सर्वदेवभेदानां तैर्वंदितानम

S8

स्तुता ॐ हरिब्रह्मेन्द्रसेवितायै नमः

९ हयारूढासेविताङ्घ्रिः हयारूढा

नामश्वरूपमात्रमेनानीशाक्तिर्विश्व

करीतयासेवितावङ्घ्रीयस्याःसात

था ॐ हयारूढासेविताङ्घ्रयेनमः

१० हयमेधसमर्चिता हयमेधेना

श्वमेधेनसमर्चितापूजिताकुरु

क्षेत्रादिग्रामयेश्वाविभिरित्यर्थः

ॐ हयमेधसमर्चितायैनमः ११ ह

र्यक्षवाहिनी,, वाहयतीतिवाहनं

हर्यक्षःकेसरीसवाहनंयस्याःसा

तथा महालक्ष्मीरूपङ्गेत्यर्थः

त्रि॰ वि॰ ५२

57

ॐहयमेधसमर्चितायैनमः ॐहंस
नवाहिन्यैनमः ९ हंसवाहना हंसि
गच्छतीतिहंसः सूर्यः प्राणो वा वाह
नवदापारमूनप्रत्येकमित्यर्थः अ
भिव्यक्तिस्थानमितियावत् सूर्यस्या
यंप्रकृष्टेयस्यासावादित्येसपकेऽ
न्तिष्कते: अथवा हंसवाहनावाली
रूपेत्यर्थः ॐहंसवाहनायैनमः ९
हतदानवा हतायेदानवा अनेकप्र
काराशक्तिरूपधरयामहासुरादयः
ययासातया ॥ ॐहतदानवायैनमः
॥ हत्यादिपापशमनी हत्यात्रल

हत्यादीर्येषांतानित्तथापापानिश
मयन्तीतितथा हरिर्हरतिपापानी
तिवचनात् ॐहत्यादिपापशमन्यै
नमः १२ हरिदस्यादिसेविना हरि
हर्योमरकतश्चवास्तोयस्येंद्रस्तथा
सत्यादीर्येषांदिकातीनांतैःसेविना
चरणारविंदसन्निधिंकिंकरतया
श्रितइत्यर्थः ॐहरिदस्यादिसेवि
तायैनमः १३ हस्तिकुंभोत्तुंगकु
चा हस्तोस्यास्तीतिहस्तीगजस्त
स्यकुंभौगंडौतद्वदुत्तुंगौकुचौ
यस्याःसातथा ॐहस्तिकुंभोत्तुंगकु

त्रि॰
वि॰
५८

वायैनमः १४ हस्तिकृत्तिप्रियांगना
हस्तिनः कृत्तौ चर्मणि प्रियः प्रीतिमा
न् शिवस्तस्यांगना भामिनीत्यर्थः ॐ
हस्तिकृत्तिप्रियांगनायैनमः १५ हरि
द्राकुंकुमादिग्धा हरिद्राकुंकुमाभ्या
मुपलक्षणं कस्तूरीपङ्कादीनां दिग्धा
लिप्तेत्यर्थः ॐ हरिद्राकुंकुमादिग्धा
यैनमः १६ हर्यश्वाद्यमरार्चिता ह
र्यश्वः हरेश्वाद्यादिर्येषां ध्रुमराणां
तैरर्चिता किंकरतयानियामकत्वेन
पूजितेत्यर्थः ॐ हर्यश्वाद्यमरार्चिता
यैनमः १७ हरिकेशसखी हरिद्व

णीः केशाः शिरोरुहा यस्य सः हरि
णपश्मश्रुः हिरण्यकेश इति श्रुतेः
तस्य सर्वाङ्गयोजनमनपेक्ष्याप
कारिणीत्यर्थः वर्णेननीलेन हृ
रिणा विस्मनासमाः शिरोरुहा य
स्यास्मीतिवा हरिकेशसमाः के
शा यस्या स्मीति सर्वांगसुंदरत
न्मयौवनविड्रूपरहितकामेश्वर
इतिवार्थः ॐ हरिकेशसख्यै नमः
९८ हादिविद्या लोपामुद्रोपासि
ततन्त्ररूपा इत्यर्थः ॐ हादिविद्या
यै नमः ९९ हालामदालसा हाला

त्रि·
वि·
५५

याश्वमन्तमथनोह्वन्तवाहणपामदे
नेडल्लासेनोह्वासारन्तनेत्रोनरो
मोचादिविकृवतीत्यर्थः २ इतिश्री
त्रिशतीनामार्थप्रकाशिकायांद्विती
यखंडेप्रथमवर्णानामार्थप्रकाश
नेषष्ठंप्रकरणं ६ सकाररूपा सका
रोरूपंद्वितीयखंडेद्वितीयावयव
त्वेनज्ञापकोयस्याःसातथा ॐस
काररूपायैनमः १ सर्वज्ञा प्रत्युत्प
नित्यज्ञानस्वरूपेणसामान्यरूपे
णसर्वंजानातीतिसर्वज्ञा यःसर्व
ज्ञइतिश्रुतेः ॐसर्वज्ञायैनमः २

सर्वेशी सर्वस्यकार्यकारणस्यांत

र्यामिद्रूपेणैव प्रेरयतीति तथा

ॐ सर्वेश्वैनमः २ सर्वमंगला स

र्वप्रकारेणस्तुत्य विशिष्टचैतन्यरू

पेण मंगला परमानंदस्वरूपा अ

त्र बहुव्रीहेरविवक्षितत्वाद्विवक्षा

यां वा सुंदरकामराजेत्यादिवत्स

मासार्थः अथवा सर्वेषां मंगला

यनः सा सर्वैः प्रकारैर्ध्यानकीर्ते

नपूजानमस्कारायल्पभक्तिजन्य

कैंकर्यं ज्ञडानामपि मंगलं सुखंय

तः सकाशात्प्राप्यते सा तथा सर्वे

त्रि॰
वि॰
६॰

षामात्मस्वरूपतयाप्रतीयमानेमंग
लेस्वस्वस्वरूपेयस्मात्सेतिवा सर्व
शब्दवाच्यःसर्वकारणोशिवः तस्य
मंगलेस्वेयस्माज्जायतेस्मातथा
सच्चिन्मयःशिवःसाक्षीतस्यानंदम
यीशिवेतिविचारः अथवामंगल
शब्देनमंगलहेतुभूताःस्त्रियोलक्ष्य
ते सर्वेषांप्राणिनांमंगलंमंगलसा
धनभूतायोषाःस्वाभिन्नसच्चिदानं
दत्वेनयस्याःसातथा एतस्येवानं
दस्यान्यानिभूतानिभूतानिमात्रा
मुपजीवंतिश्रुतिरित्यर्थः अ

शुभानि निराचष्टे तनोति शुभ
संततिं स्मृतिमात्रेण यत्पुंसां
ब्रह्म तन्मंगलं विदुः अतिक
ल्याणरूपत्वान्नित्यकल्याणसं
श्रयात् स्मर्तॄणां वरदायित्वाद्ब्र
ह्म तन्मंगलं विदुरित्यादिवचना
त् ॐ सर्वमंगलायै नमः ४ स
र्वकर्त्री सर्वं समस्तं स्वशक्त्या मा
यारूपया करोतीति तथा ईशि
त ईशित्रीभिर्जननीभिः परमश
क्तिभिरिति श्रुतेः ॐ सर्वकर्त्र्यै न
मः ५ सर्वभर्त्री सर्वं बिभर्तीति

त्रि॰ तथा पञ्चविभूतिरेषांलोकाना
वि॰ मितिश्रुतेः ॐसर्वभर्त्रेनमः ८ स
९१ र्वहर्त्री सर्वंहरतीतितथा प्रभि
नीमभिरस्त्रिभिर्यतोवाइमानिभूता
निइत्यादिश्रुत्युक्तनटस्थलक्षण
त्रयमभिहितमितिवेदितव्यं ॐ
सर्वहर्त्रेनमः ७ सनातना श्रजो
नित्यः शाश्वतोयंपुराणोइतिश्रु
तेर्नित्यशुद्धबुद्धस्वरूपेत्यर्थः ॐ
सनातनायैनमः ८ सर्वानवद्या
सर्वैर्ज्ञानैश्वर्यादिगुणैरनवद्याश्र
वर्ण्यनासकयापिविषयाहीनाज

उप्रकृतिर्मिथ्याबाध्यमानत्वान्न
द्विचक्षणा सत्यज्ञानानंदस्वरूप
त्वादनवद्यासर्वेषांस्वलाभीष्ट
प्रापकत्वेनस्तुत्यावा ॐसर्वानव
द्यायैनमः ९ सर्वांगसुंदरी स
र्वाणिचतानिअंगानिचावयवाः
शिरःपाणिपादयस्तेष्वन्यूनातिरि
क्तभावत्वाद्यथासामुद्रिकलक्ष
णंतद्वत्वेनसर्वांगसुंदरी अथवा
सर्वेषामंगेषुशरीरेषुअवलरूप
नयास्पतप्रेमविषयत्वेनसुंदर
पदार्थेदविनाभाववांछाविषय

त्रि॰
वि॰
८२

62

वनात्तथा ॐसर्वांगसुंदर्यै नमः
१० सर्वसाक्षिणी सर्वेषांभूतानां
कार्याणांस्फूर्तीधायकत्वेनप्रका
शकत्वात्तथासर्वसाक्षीदीक्षितत्
त्विवात्तथा ॐसर्वसाक्षिण्यैनमः
११ सर्वात्मिका सर्वेषामात्मस्वरू
पत्वात् यच्चाप्नोतियदादत्तेयच्चा
त्तिविषयानिह यच्चास्यसंततो
भावस्तस्मादात्मेतिगीयतेइतिव
चनात्तथा ॐसर्वात्मिकायैनमः
१२ सर्वसौख्यदात्री ह्यविनोभावः
सौख्यं सर्वाणिचतानिप्रियमोद

प्रमोदानंदशब्दवाच्यानि इष्टद
र्शनजन्यं सुखं प्रियं तल्लाभजन्य
मोदः तदनुभवजन्यं प्रमोदस्त्वा
नंदः समष्टिजीवो भोक्ता तानि द
दातीति तथा सर्वप्रकारैः स्मरणा
दिभिः सौख्यं ददातीति वा सर्वेषा
माब्रह्मस्तंभपर्यंतानां यथाकर्मो
पासनं प्रत्यहेन वर्ध्यमानं ज्ञानै
श्वर्यादिसहितं सुखं ददातीति वा
तथा पञ्चधैवानंदयातीति स्मृतेः
ॐ सर्वसौख्यदायै नमः १३ सर्ववि
मोहिनी सर्वान्विमोहयतीति प्र

त्रि॰ न्यथा ग्राहयति अज्ञानेनावृतं ज्ञा
वि॰ नं तेन मुह्यन्ति जन्तवः अज्ञेना
९२ हि प्रसूह्या इति स्मृति स्मृतिभ्यो ज्ञ
ज्ञानावरणशक्तिकार्य मोहनादि
सत्ताप्रकाशादिप्रदायिस्थानत्वेनो
पचारात्सर्वमोहिनीत्युच्यते अपो
दहतीतिवत्, ॐ सर्वविमोहिन्यै
नमः ९४ सर्वाधारा सर्वस्याधारो
ब्रह्मपुच्छं प्रतिष्ठेति श्रुतेः सर्वेषा
माधारहृदयाकाशाधारोभिव्यक्तिः स्था
नमुपासनायाः सेति तथा ॐ सर्वा
धारायै नमः ९५ सर्वगता सर्वग

श्रुतिस्तथाऽनेनजीवेनात्मना
नुप्रविश्येतिश्रुतेः ॐसर्वगता
यैनमः ९८ सर्वावगुणवर्जिता
यवमानहेतवश्चनेगुणाश्चत
थाध्यासिकसंबंधेनारोपिताः
सत्वादयःसमष्टौअंतःकरण
धर्माःकामादयोव्यष्टौसर्वेचते
अवगुणाश्चतथासर्वांतर्यामि
त्वेनसर्वानुस्यूतत्वेपितदुपाधि
निष्ठैर्नमायमयधर्मैणासंबध्य
नेघटादिनिष्ठाकाशवत् कोशां
तर्गतत्वङ्गवच्छासूर्योयथासर्व

त्रि· वि· ८४

64

लोकस्यचक्षुर्नलिप्यते चाक्षुषै
र्बाह्यदोषैःएकस्तथासर्वभूतां
तरात्मानलिप्यते लोकदुःखे
नबाह्य इतिश्रुतेः ॐसर्वावगुण
वर्जितायैनमः १७ सर्वारुणा स
र्वेषांगेष्वरुणाआरक्तवर्तीअसौ
यस्ताम्रोऽरुण इतिश्रुतेः ॐस
र्वारुणायैनमः १८ सर्वमाता॥
सर्वेणकार्येणमीयतेनुमीयते
अभेदेनेति तथाहि इदंजगद्ब
लाभिन्नेनतत्सत्तास्फूर्तिनियतस
त्ताप्रकाशज्ञानविषयत्वात् यो

यत्रियतनसत्ताप्रकाशवान्सत
दभिन्नः यथातन्तुकार्यंपटश्ति
सर्वात्मिनोतिस्वाभेदेनजानीते
इतितथा ॐसर्वमात्रेनमः ४९
सर्वाभरणभूषिता सर्वात्मकत्वे
नयेयेप्राणिनोयानियानिभूष
णालंकारभोजनादिभोगवस्तू
न्यात्मार्थंसंपादयंतितेषांसर्वै
षांप्रसन्नक्षिपातैः सर्वैर्भूषिताउ
पलक्षितेत्यर्थः आत्मनस्तुकामा
यसर्वंप्रियंभवतीतिश्रुतेः अ
थवासर्वदेवात्मकत्वेनसर्वभ

त्रि॰ वि॰ ८५

65

क्तजनस्वस्वेष्टदेवताप्रीत्यर्थंभू
षि तभूषितत्वेनतथा अथवा
सर्वैर्भक्तजनैस्तत्तद्देवयवेषभू
षणैरारोपितास्वस्यामहाराज्ञी
त्वेनासंगोदासीनस्वभावत्वादि
तिभावः यद्वासर्वदेशकाललो
केषुभूषणैस्तत्प्रभवैस्तद्भाव
वैर्भूषणैर्भूषिता हस्त्यश्वादि
देहोपाधिकामतीनत्तदीयालं
कारादिष्वविरहितेत्यर्थः भूष
यंतिसर्वांतमत्वेनप्रतिपादयं
तीतिभूषणानि वेदांतमहावा

क्यानिःसर्वैःसमस्तैस्तैर्गतिसा
मान्यादेकतात्पर्येणभूषितलक्ष
णयापर्यवसितासमन्वितावे
मर्थः ॐसर्वभूषणभूषितायै
नमः २ इतिश्रीत्रिशतीनामार्थ
प्रकाशिकायांद्वितीयखंडेद्विती
यवर्णनामार्थप्रकाशनेनाम
सप्तमंप्रकरणं ७ ककारार्थो कं
ब्रह्मेतिश्रुतेः तस्यसुखोर्थः स
च्चिदानंदलक्षणंब्रह्मैवआत्मैवे
दंसर्वंब्रह्मैवेदंसर्वमित्या
दिश्रुत्या तद्व्यतिरिक्तस्यातदर्थ

त्रि॰
वि॰
९९

स्थापितत्वात् ॐकारार्थीयेन
मः २ कालहंश्री मजपारूपेण प्रा
णापाननामकवेदस्यैनियमने
प्रकृष्टाणां नियमितपरमाणुःस्व
रूपैकविंशतिषट्शताधिकम
हस्रसंख्याकनिर्गमनरूपेण सं
ख्यापयताश्ववशोऽप्युष्णोपुगक
ल्पायवशिष्टस्यहंसोऽपुनःपुनः
संयमनेनत्याहंसोऽयंजानस्यम
वेद्याणांदियहत्तिलयेमनोन्म
न्यावस्थानिष्पत्तये तथाचक्र
तिः पृथिव्यमेजोनिलखेमत्र्यस्य

ते पंचात्मके योगगुणे प्रवृत्ते न
तस्य रोगो न जरा न मृत्युः प्राप्त
स्य योगाग्निमयं शरीरमिति श्रु
त्यात्मयोगाधिनमेन देहं मत्वा
धीरो हर्षशोकौ जहातीति च न
दानीमाविर्भूतेन बलस्वरूपेण न
नः संवत्सरोऽजायतेति श्रुत्या
क्रियाशक्त्यात्मककालोत्पत्तिश्र
वणात्तस्मिन्बलरूपे वलये काल
हं तेन नाशयतीति तथा नामनि
र्वचनेऽप्युक्तमुत्पश्यामइति भावः
ॐ कालहंत्र्ये नमः २ कामेशी का

त्रि॰
वि॰
९२

मानां भोग्यपदार्थानां यथादृष्टमीहे प्रेरयतीति तथा ॐ कामेश्वै नमः ३ कामितार्थदा कामितानर्थान्ददातीति तथा आत्मकामश्चात्मकाम इति श्रुतेः संसारदशायामहन्तानेदन्तानात्मवदवभासमानस्यात्यन्तिकसुखात्मिकमुक्तिर्मे स्यादिति कामयमानत्वादात्मनः कामितस्था सावर्थश्चेति तस्य वक्तानस्याभिभावकत्वेन प्राप्तप्राप्यरूपतया तं ददाति प्रयच्छति प्रकाशस्वरू

येणानुभावयतीतितथा ॐका
मितार्थदायैनमः ४ कामसंजी
वनी कामंमन्मथंपरमेश्वरने
त्राग्निविप्लुष्टंभंडासुरात्मनाने
ककालदेवलोकविपन्नंकाम
शास्त्रप्रयोगसमयेरतिदेवीप्रा
र्थनासध्रीचीननदीयपूर्वकाम
नपश्चर्यापरिपाककफलभूतक
रुणारसपूरितायोगावलोक
नेनसंजीवयतिसप्राणीकृत्वान
स्मैवरादिप्रयच्छतितेनतंहर्षय
तीतितथा ॐकामसंजीवन्यैनमः ५

त्रि·
वि·
८८

कल्या कलितं ध्यानं योग्या अथवा
सर्वोत्तमदेवत्वेनादातं कलितं
योग्यात्मकल्या कलेः कामयेत्वे
नयथावांछमर्थं कारणं ॐकल्या
यैनमः ८ कठिनस्तनमंडला स्त
नयोर्मंडलं आदिमभागो स्तोनप्र
देशौ अप्रकंपेप्रतिस्थिरेवायस्याः
सातथा ॐकठिनस्तनमंडलायै
नमः ७ करभोरूः करभमिवोरू
यस्याः सा तथा भणिबंयादाकनि
ष्ठं करस्य करभो वहिरितिभावः
ॐकरभोरवेनमः ८ कलानाथमु

र्वी कलास्वतः शब्दिर्नाथयतिप्रे
रयतीति कलानाथेनिःश्वसित
मेतयदृग्वेदोयजुर्वेदः सामवे
दइत्यादिश्रुतेः नादशब्दवेवद
नेयस्यास्तीतितथा कलाना
थश्चंद्रववमुखंयस्यास्तीतित
था ॐकलानाथमुख्यैनमः ए क
चजितांवुदा कचेनकेशभरेण
कवरेणेत्यर्थः जितास्तयरीकृता
अंवुदामेघायययासातथा मेघमे
उलापेक्षयाऊर्ध्वगामिशिरोरुह
भाराव्योमकेशीतियावत् अथ

त्रि॰
वि॰
९९

वाकेशवर्णिनीलरूपेणवामाद
क्षणासहात्वेनाथरीकृतामेवायथा
मातथा ॐकचाजितोद्धदायैनमः
९ कदाहंस्पदिककरुणा यद्यदिदी
नेषुपरिपालनाद्युद्दिदैवादीनां
महतीकरुणेमस्त्वाने तथापिन
स्याग्रांतरत्वेनाश्राद्यायमाननाया
नेषुभक्त्यातिशयेनत्रहत्यर्थमे
वादौतहतात्वानस्यावश्यकफल
दानादिहेतुतयानिश्चयेनतदव
मायिकसात्विकवीक्षणसमेरमे
भावणादिवत्वेनत्रावश्यंभाविरू

त्तिकार्यमत्त्वप्रसंजितकारण
मोत्त्ववत्वात् करुणयानवरसे
षेतर्भावात् रसशाहूस्यचमत्क
रादैहृद्धत्वात्तेषामनिर्वचनीय
त्वेप्यनुभवगोचरतायामित्यादि
मार्द्दवपदार्थनिष्ठत्वोपलक्षे
णत्संबंधवशात्परंपरयार्द्रव
द्रूपहृन्निस्यंदनरूपक्रियाश्रय
त्वमुपवर्यतेनतथाचकटाक्ष
योःस्यंदनीकरणपरिपालिता
ङ्घ्रिरूपायस्याःसातथा ॐकटा
क्षस्यंदिकरणायैनमः ११ कृपा

त्रि॰
वि॰
७॰

७०

लिप्राणनायिका कपालमस्या
लीतिकपालीप्राणेदभैरवस्त
स्यप्राणनायिकाप्राणस्येत्युपल
क्षणं पंचप्राणनायिकाधिष्ठानत्वे
सतिप्रेरका नप्राणेनचापानेन
मर्त्योजीवतिकश्चन इतरेणतु
जीवंतियस्मिन्नेतावुपाश्रितावि
तिश्रुतेः तस्यामपिहृदयांतर्व
र्तिपरमेश्वरस्वरूपेतियावत् प्रा
णवल्लभेतिवाप्रियनायिकेति
भावः ॐकपालिप्राणनायिकायै
नमः १२ कारुण्यविग्रहा कारु

णपूर्वोक्तकृपाकरणस्वभा
वस्तद्विग्रहोमूर्त्तिरस्याश्चली
नितथा कारुण्यस्यांतःकर
णपरिणामवृद्धिरूपत्वेनने
त्रोनदीतास्मेरभावादिना
नुमीयमानत्वेपिसाक्षात्तज्जन्य
मनोवांछितवरप्रदानादीनां
शरीरावयवविशेषजन्यत्व
याकारुण्यंविग्रहोयस्याइति
समासोपपत्तिः मायोपाधिक
स्वब्रह्मणोजगत्सृष्ट्यनुकरण
हेतुभूतस्वेच्छामात्रनिमित्त

त्रि॰
वि॰
७१

ककर्माधीनसच्चिदानंदघनी
भावात्मकभक्तानुग्रहवतोवि
नादेवतायोबुद्ध्यामनारोहिस
गुणोपासनमनुपपद्यमानं
स्यात् तदर्थंदेवताधिकरणे
मंत्रप्रकाशितादेवता वज्रह
स्तःपुरंदरइत्यादिस्वतःप्रमा
णवेदवाक्यवशाद्बाधकाभा
वेविग्रहवत्तांगीकर्तव्याइति
सूत्रकारभाष्यकाराभ्यांप्रति
ष्ठापिते तन्न्यायेनमांहैमवती
मिति केनोपनिषद्भाष्ये हैमा

निहेमविकाराणिभूषणानि
अस्याइतितथा हिमवतोपत्यं
स्त्रीतिवानथेतिश्रीभाष्यकारः
परदेवतायादिव्यमंगलवतं
प्रतिष्ठापितं तथाच महानु
भावानांस्वप्रकाशचैतन्यरूपा
णां एवंभूतानांसर्वोत्तमानां
मूर्त्तित्रयजगत्कुटुंबादिदेवता
ध्यानाद्युपकारायताद्दशामूर्त्ति
मत्वमस्तीति नकिंचिदनौच
रशंकाशास्त्यास्तांविस्तारः ॐ
कारणपदवियहायैनमः ६ कां

त्रि॰
वि॰
७२

नोंकारस्ट्रदीमा विति धान्तरस्पेन
मनोहरत्वमेवेत्यर्थः मदनगो
पालविग्रहोवा कदाचिदाघ्राल
लिताष्टरुषाह्रुस्लविग्रहा वेण
नादसमारंभादकरोद्विवशंज
गदिति त्रिपुरातापनीये ॐको
नायैनमः १४ कोनिष्ठृतजया
वलिः जयानोजपाष्टष्पाणां
मुपलक्षणमन्येषामारक्तव
र्णानांवस्तूनांश्रावलिः पंक्तिर्दै
होनत्वेनकविभिरुत्प्रेक्षिताको
मात्रप्राकृतस्वछपरमानंदवि

ज्ञास्याभूतापरित्यक्ताष्टाकृतवे
नाल्पकांतिमन्त्रयोपमाश्वयो
ग्यत्तयाययास्या नमह्रांतोनी
चैरूपमीयंनेइतिन्यायादिति
भावः ॐकांतिभूजनपावल्पेन
मः १५ कलालापा कलास्वनः
षष्ठिकलाश्वालापोव्यावहारि
कष्टाह्रोयस्याःसातथा वेदशा
स्त्रमयीवाणीयस्याःसापरदेव
नेतिवचनात् कलमव्यक्तंम
धुरःसम्प्रयोजनश्वालापश्वाला
पोयस्याःसाइतिवातथा श्रव्य

त्रि॰
वि॰
७३

र्यां भारतीतयेतिष्ठरूपसामुद्रि
कवचनात् ॐकलालापायैन
मः १८ कंबुकंठी कंबुशाहेनशं
खनिष्ठरेखात्रयेंलक्ष्यते तद्वा
न्कंठोयस्याःसेतितथा गौणना
मेदं ॐकंबुकंठ्यैनमः १७ करनि
र्जितपल्लवा करशाहेनकरतले
लक्ष्यतेपल्लवशाहेन तन्निष्ठापा
टल्यात्स्निग्धताल्लक्षणायार्थः त
था चान्योन्यशरणयोर्जयपराज
येअ्रर्थीतद्धतोरपितैःस्निग्धावि
तितन्नामोपपत्तिः विवाहस्य

विवादस्थसमयोरेव शोभते इति
वचनात् करतलनलाभ्यामध्यानि
रनेननाम्नाहृता करेणनिर्जि
ताःपल्लवाययासानया ॐक
रनिर्जितपल्लवायै नमः ८८ क
ल्पवल्लीसमभुजा यथादिव्य
हस्तानंदनोद्याने प्रसिद्धास्तथा
नदलंकाराय वल्ल्यादयोपि क
ल्पयंते संपादयंति इति कल्पाः
कल्पाश्चतावल्ल्याश्चवनतयस्ता
भिःसमाभुजाहस्तादयःसात
था कविसंप्रदायप्रासमहीभु

त्रि॰
वि॰
७४

७४

ज्ञानांवल्लीसाम्योक्तिरितिमंतव्यं
श्रुतसमपदस्वारस्येमतेषामपि
तदवछिन्नचैतन्यह्वारायथाप्रा
रब्धंचैतनवल्लोकेवांछितपाल
कत्वमितिध्वनितेपकस्तथास
र्वभूतांतरात्मारूपंरूपंप्रतिरू
पोबभूवेतिश्रुतेः तत्तदेवाव
गछेत्वेममतेजोंशसंभवमिति
स्मृतेश्च भगवतास्वकीयसच्चि
दानंदस्वरूपावाप्तिरेवोक्ता
सतएवपरदेवताभुजानांनीव
साम्योक्तिशेकानिरस्तावेदितव्या

गैपाधिकचैतन्येनतथाभूत
चैतन्यस्यसाम्योपपत्तिः ॐक
ल्पवल्लीसमभुजायैनमः १९
कस्तूरीतिलकांचिता कस्तूरी
तिलकेनललाटदेशस्थापित
हिंबाकारमृगनाभिनाखंचिता
विच्छितास्वलंकृतेत्यर्थः ॐक
स्तूरीतिलकांचितायैनमः २०
इतित्रिशतीनामार्थप्रकाशि
कायांद्वितीयखंडेतृतीयवर्ग
नामार्थप्रकाशनमष्टमंप्रक
रणम् ८ ॐनमस्त्रिपुरसुंदर्यै

त्रि॰
वि॰
७५

हकारार्थी हकारस्याकाशावी
जस्यार्थाग्रर्थस्वरूपावैनन्याका
शाविग्रहेत्यर्थः आकाशोहवै
नामनामरूपयोर्विहितातेतदं
तरातद्ब्रह्मेतिश्रुतेः ॐहकारा
र्थायैनमः १ हंसगतिः हंतिग
च्छतीतिहंसः प्राणआदित्योवा
हंसस्यप्राणस्यगतीगमनाग
मनेलक्षणयातज्जाप्याजपामं
त्ररूपायास्तेयस्याःसातथा ह
कारेणवहिर्यातिसकारेणावि
शेत्पुनरितिवचनात् तदभि

मानि देवतारूपाग्नीषोमात्मक
सूर्यचंद्रगती अहोरात्रात्मक
कालस्वभावायायस्याःसातथा
हेति देहाद्देहांतरंगच्छति स्वक
र्मवशेनेति हंसोजीवस्तस्यग
तिःप्राप्यस्थानंमुक्तिरित्यर्थः
ब्रह्मविदाप्नोति परंयज्ज्ञात्वानन्नि
वर्तंते इति श्रुतिस्मृतिवचनात्
अथवा हंति स्वकार्यभूतंजग
त्प्रविशतीति हंसः हंसस्तुपर
मेश्वर इति नृसिंहतापनीयेग
म्यते प्राप्यते शरणत्वेन प्रपद्य

त्रि॰
वि॰
७८

नैवतत्त्वविंयमङ्क्तैरितिगतिः हंस
श्चासौगतिश्चेति समानाधिक
रणसमासः हंसःशुचिषदिति
श्रुतिः अहोस्विद्धंसस्यबलवा
हनस्यगतिरेवगमनंयस्याःसा
तथा उताहोहंसशब्देननामै
कदेशेनहंसकंपादकमुच्यते
गम्यतेनेनेतिगतिश्चरणेहंस
कगती पादारविंदेयस्याःसा
तथा हंसशब्देननित्यानित्यस
दसदजडाजडादिवस्तुविवेक
समर्थाःश्रेष्ठागच्छंतिप्राप्नुवंतियया

मेध्रतिदेशमितिहंसाःपरिव्रा
जकास्तत्रयोऽश्रमिणोनिष्का
माश्लेषांगतिर्ज्ञायतेगम्यतेसा
ह्यात्क्रियतेश्लतिगतिः सन्यास
योगाद्यतयःशुद्धसत्त्वाइतिश्रु
तेः येपूर्वेदेवाऋषयस्तत्तद्वि
दुस्तेतन्मयाऋषयस्तताहिद
रितिश्रुतेः जीवन्मुक्तपुरुषा
नुभूयमानपरमानंदमुक्तिस्व
रूपेत्यर्थः ॐहंसगतयेनमः २
हाटकाभरणोज्ज्वला हाटकस्य
सुवर्णस्यकार्यादीनिवस्तान्या

त्रि॰
वि॰
७७

भरणानिहाटकाभरणानितैरु
ज्वलातथाप्रकाशिनालंकृतेत्य
र्थः हाटकस्यसुवर्णरूपस्यव
लंडस्याभरणवदुज्वलाप्रका
शकरीसन्नास्फूर्तिकरीत्यर्थः
यद्वातस्मिन्नाभरणेमंगलसूत्रा
दिभिःसनाथस्त्रीमंडलस्वरूपेरु
ज्वलतीति आहोस्वित्कार्यकार
णद्वयरूपवस्तुदानेनवस्तुस्वरू
पेणवाउज्वलतिप्रकाशतेइति
तथा वस्त्वंतरितत्त्वसदितिश्रुतेः
ॐहाटकाभरणोज्वलायैनमः २

हाराहारिकुचाभोगाद्धरस्याप
रमेश्वरस्यइमेसंबंधिनहारा
ईश्वरत्वामकामत्वनिष्पादत्वा
दयोर्गुणास्तान्हरति नहिप
रीताविद्यादानेनोत्पादयतीति
हाराहारीकुचयोराभोगःपर्य
न्तभूमिर्यस्याःसातथा परमे
श्वरस्यतद्विषयकवांछयात
देकसक्तमानसत्वेनतत्कार
णीभूताज्ञानवशवर्तित्वेन
वशीकृतमायास्वरूपेश्वरत्व
सामानाधिकरण्यामकामत्वा

त्रि· दयोपहृता जीवेश्वरत्वयोर्नैक
वि· त्रतेषांतद्गुणानांसामानाधिक
७८ रण्ययोगादित्यर्थः तथाचेश्वर
स्यसदिष्टसाधनमित्यन्यत्रपदा
र्थेबुद्धिमत्त्वस्यैववहुभवनरूप
तया तस्यजगदाधारत्वाधायक
त्वादिगुणवत्त्वोत्प्रेक्षाविपर्य
येनाभोगस्यातिशयोक्तिरिति
द्रष्टव्यं अथवाहारान्मुक्तास्रजो
हरतिअपायनइतिहाराहारीऊ
वाभोगोयस्याःसेतितथा द्वाद
प्रकारमुक्ताहारेणयथोचित

कालंमूषितनवतीत्यर्थः ॐहारा
हारिकुचाभोगायैनमः ४ हा
किनी हाकयतिजन्ममरणयोः
खेदयतीतिहाकिनीहाकखेद
इतिधातुपाठात् ॐहाकिन्यैन
मः ५ हल्पवर्जिता हलसंबंधि
हल्पंकष्यादिहाराजनकत्वेन
वर्जितमायादिविहीनशुद्धचै
तन्यस्वरूपत्वात् हल्पंकपटो
मित्रेषपिग्रन्थ्याखांतःकरण
विकृतिस्तेनवर्जिता ग्रविचार
हितनत्वंपदलक्ष्यार्थमतत्वा

त्रि॰
वि॰
७५

79

दितियावत् ॐ हल्पवर्जितायैन
मः ८ हरित्पतिसमाराध्या हरि
तो दिशां पतयो महेन्द्रादयस्तैः
सम्यक्श्रद्धाभक्तिपूर्वकमाराधि
तेयोगपातहृत्पत्तनिवर्हणेनेष्ट
प्रापकदेवतात्वादित्यभिप्रायः
ॐ हरित्पतिसमाराध्यायै नमः ९
हठाकारहताहुरा हठाकारे
णातिशीघ्रतया हता पराभूता
असुराः सुरविपक्षा महिषादयो
यया सा तथा समबलयोः कि
लबलावलविचारणा च भवति

प्रबलस्पर्द्धबलेषुवैरिषुसिंह
स्पमेषेषिवतदयोगेनातिव
स्याविचारणीवदेवलोकस्त
स्वप्रवेशितानामर्थ्यविचारणा
यामितरेषुकैमुतिकन्यायेन
तत्कारणंधनितमितियोजनी
यं ॐ हठात्कारहतास्वरायेन
मः ८ हर्षप्रदा हर्षोनामानंद
कारकोमुखविकासादिकार्यो
त्रेयः स्वात्मसंभावनेनस्पारि
भवानिमित्तास्विन्नहानिविशेषः
कार्यस्यकारणाविनाभावत्त

त्रि· यातम्प्रदानेनतडेतोरप्यात्तिप
वि· तीतिसर्वप्रदाउत्पर्थः प्रददा
८· तीतिप्रदायद्वाहर्षेथनयौव
80 नादिसर्वपुत्रवंपुवर्गादिरू
पेणापद्दत्यप्रकर्षेणाग्यतिवे
ङयतीतिवातथा ॐहर्षप्रदायै
नमः ५ हविर्भोक्त्री सर्वलास
शिवःसंहृउतिक्षतेः वसुरुद्रा
दित्याकारेणहवींषियजमाने
नाग्नौप्रक्षिमानिस्वाहासुखेन
भुंक्तउतितथा यद्वाहवींषिका
लोतरभाविफलान्यदृष्टात्म

नासूक्ष्मसूपाणितनयजमान
जीवगतानि भूतसूक्ष्माभिधा
नानि समष्टिव्यष्ट्यात्मनाईश्व
रजीवोपाधिभूतानि मायावि
द्याशब्दितानि सुक्तिपर्यन्तेषु
नक्तिपालयति रक्षयति वा त
था अन्यथा संसारस्यानादित्वा
भावेनादिमशरीराद्युत्पत्तौ उ
परिक्रियमाणायां प्रपंचस्या
कस्मिकत्वमकृताभ्यागमप्र
संगश्चस्यादिति भावः ॐ हवि
र्भोक्त्रे नमः ९ हार्दसंतमसा

त्रि· वि· ८१

यद्वा हृदयावच्छिन्नो हार्दो यो वे
द निहितं गुहायामिति श्रुतेः त
स्मिन्यत्तं तमस्तमावरकत्वात्तम
आसीदिति श्रुत्या चात्मविषय
कं तदाश्रयमज्ञानमनर्थका
रिअव्याकृतमाकाशमित्युच्यते
महावाक्यश्रवणजन्यधीवृत्ति
प्रतिफलितकरेणापहंतीति
स तथा नाहं ब्रह्मास्मि संसारी
ब्रह्म नास्ति न भातीति अज्ञान
स्याहं ब्रह्मास्मीति सच्चिदानंद
लक्षणमित्येकाकारवृत्त्या भा

न्निवापित्वनियमेनवातदपि
ष्ठानेनवा नेहनानेतिङ्कति
प्रसिद्धवल्लस्वरूपेतियावत्
ॐह्रार्दसंनमस्मापह्रायैनमः
११ ह्स्लीमलास्यसंतुष्टा ह्स्ली
मैस्थित्रदं डैः कुमारिकाभिरेक
तालादिगतिपूर्वकंपल्लास्यं
नर्तनंतास्मिन्संतुष्टाप्रीतिम
तीत्यर्थः ॐह्स्लीमलास्यसंतु
ष्टायैनमः १२ हंसमंत्रार्थरू
पिणी हंसैः परमहंसैरुपास्या
योमंत्रः प्राणसंवादिनत्वातस्मा

त्रि॰
वि॰
८२

र्थद्रूपवतीवाचालक्ष्यार्थस्वरू
पेणज्ञायमानेत्यर्थः यद्वाहंस
मंत्रोजपाहकारसकारशोपि
नत्वंपदार्थाहकारस्यापरोवा
चिनः सकारस्यनाटशास्यभाग
त्यागलक्षणयानिष्पन्नं नित्य
शुद्धमुक्तसच्चिदानंदस्वरूपेत्य
र्थः ॐहंसमंत्रार्थरूपिण्यैनमः

८२

८२ हानोपादाननिर्मुक्ता श्रुति
ष्मायनेदानेपरित्यागक्रिया
२ष्मायनेउपादाने स्वीकार
क्रियापरिजिहीर्षा श्रादित्सोवा

ल

प्रज्ञाणोऽमनाः शुभ्रप्रकार्यं
निष्क्रियं मशरीरं वाव संतनपि
याप्रियेस्पृशतइतिबुद्ध्यते
रशरीरस्यब्रह्मणोऽनःकरणा
दिधर्माणामसंभवान्नाभ्योनि
र्मुक्तासंगेत्यर्थः विमुक्तश्चवि
मुच्यतेइतिश्रुतेः ॐहानोपादा
ननिर्मुक्तायेनमः २४ हर्षिणी
एवहैवानंदयतीतिश्रुतेः हर्षं
यतिसंतोषयतीतितथा ॐहृ
र्षिण्यैनमः २५ हरिसोदरी हरि
णाकृष्णेनसमानमेकमुदरं

त्रि·
वि·
८३

83

उतईषत्तत्र चं भेदकमेवछेदक
मित्यर्थः उत उच्चैः हेकपटेवा
ऽत्यल्पमिथ्याभूतमायोपाधि
कचैतन्यावस्थाः विशेषरूपा अ
परेयमितस्त्वन्यां प्रकृतिं विद्धि
मेपरां जीवभूतां महाबाहो यये
दं धार्यते जगत् इति देवात्मश
क्तिं स्वगुणैर्निगूढामित्यादिश्रु
तिस्मृतिभ्यामीश्वरस्य स्वरूपभेदत्वा
वगमादिति मंतव्यं ॐ हरिसोद
य्यैं नमः ८९ हाहाहूहूसुखस्वरूपा
हाहाहूहूरितिनामवंतौ गंधर्वौ

मुख्योपेयोजनानांतेनतथातैः
स्तुत्या गुणातिहृद्गुणाभिया
नेस्तुतिस्तदाश्रयत्वेनप्रतिपा
दनीयेत्यर्थः ॐहाहाहूस्तुए
स्तुत्यायैनमः ९ हानिवृद्धिवि
वर्जिता अवयवोपचयरूपावृ
द्धिस्तदपचयरूपाहानिस्ताभ्यां
विवर्जिता नवर्द्धतेकर्मणानो
कनीयानितिश्रुतेरुपलक्षणं
षड्भावविकाराणांशरीरस्य
मेत्वेनकर्मनिमित्तत्वादीश्वरे
तदभावेननिर्विकारेत्यर्थः

त्रि॰ ॐ हानिवृद्धिविवर्जितायै नमः

वि॰ ८८ हैयंगवीनहृदया हैयंग

८४ वीनवन्नवनीतसदृशाविरल

84

स्नेहवयववपरिणामद्रववत्वसा

दृश्ययोगिहृदयकूपारसद्रूप

परिणामवतीतिमानतया हृ

दयाभावेपिसर्वात्मकतयाऽन

ह्यवमीत्वणादिवन्मायापरिणा

मत्वपादयावाहृदयशब्देनोच्य

ते श्रवागमनश्रुतिश्रुणापासर्वेनि

षेधात् ॐ हैयंगवीनहृदयायै

नमः ८९ हरिकोपाकरणांशुका

हरिकोपइंद्रकोपश्चाद्रौमहा
नक्षत्रेवर्षासम्भवोक्षपादोरक्त
वर्णोमृदंगः कीटविशेषस्त
थाशोणमंशुकमेवरं स्वार्थे
कप्रत्ययेकिरणानिवायस्याः
सातथा ॐहरिकोपारुणांशु
कायैनमः १ इतिश्रीत्रिशती
नामार्थप्रकाशिकायांद्विती
यखंडेचतुर्थवर्णनामार्थप्र
काशनेनवमंप्रकरणं ९ ॥

85

लकाराख्या लकारयुक्तमूल
मंत्रस्याख्या वाचकशब्दो यस्याः
सा तथा लकारस्य शक्रवीजस्य
वार्थः मेंद्रियइतिश्रुतेः लकार
युक्तस्य मायावीजस्य वा ल्रूँ इमा
येत्यर्थः ॐ लकाराख्यायै नमः
१ लता पूज्या लमंतिविनमंति
अत्यंतनम्राभवंतीतिलताः पर
मपतिव्रताः स्वकंपत्यादियोषि
त्ताभिः स्थिरमांगल्यायस्वेष्टदे
वतात्वेन पूज्या पूजनीया तत्र
के समाराध्य महेशानी भुक्तिं

त्रि॰
वि॰
८८

मुक्तिंचविंदति अथवाकेदारादि
गौरीविशेषमूर्तौललनाभिरुपल
क्षणं वन्यपूज्योपकरणैः पूज्याले
कृतशर्वरीवावनङ्गगैतिवेतिभा
वः ॐललितापूज्यायैनमः २ लयस्थि
त्युद्भवेश्वरी वैपरीत्येनविशेष
णंयोज्यं उद्भवनीत्युद्भवःकार्या
त्मनाभिव्यक्तिः स्थितिर्ज्ञानविष
यतायोग्यकालावच्छेदअनुभव
हेतुमत्ताकत्वमितियावत् प्रल
यउत्पन्नकार्यस्यकारणात्मनाव
स्थितिर्विचारंभणायोग्यतेत्यर्थः

86

तासांक्रियाणामचेतनकार्यत्वा
योगेनघटादिकार्येचेतनस्यनि
मित्ततादर्शनात् प्रकृतघटस्येश्व
रत्वंगोपुरादौनानाचेतनदर्शना
न्नादृष्टानानेश्वरत्वंवेतिविषये
यतोवाइमानिभूतानीतिश्रुतौ
यतश्त्येकवचनेपंचम्यानानात्व
तटस्थत्वेकर्तुःकृतिरितिसूत्रे
जनिकर्तुःकार्यस्यकृतिःप्रकृति
रुपादानमपादनसंज्ञकंस्यात्
अपादानेपंचमीतिशासनात्
अभिन्ननिमित्तोपादानत्वमीश्वर

त्रि॰
वि॰
८३

त्वमितिसिद्धांतः तटस्थलक्षणमे
तत् जायमानस्यब्रह्मणोलक्ष
णप्रमाणयोरवप्रपवाच्यत्वादित्य
भिप्रायः आदौलयप्राप्तोपाँनेना
नादित्वंप्रपंचस्यसूचितं जगदिति
शब्दग्रहणेननामयोजनीयं तथा
च जगतोलयश्चस्थितिश्चउद्भवश्च
तेषामीश्वरी कूटस्थचैतन्यमात्रे
णसच्चिदानंदाधायकतयाविव
र्तकारणमित्यर्थः ॐलयस्थित्यु
द्भवेश्वर्यैनमः २ लास्यदर्शनसं
हृष्टा यथाराजासंपूर्णकामःप्र

विवर्तपाद

योजनमनुद्दिश्यापिमृगयादि
लीलाविशेषान्यपिबालका
दिनृत्यंवातथाज्ञानिनादृष्टानि
ष्टमित्रोदासीनपदार्थचेष्टया
नुभवजन्यहर्षशोकादिसंभवम
दोद्रेकशोकातिरेकहेतुकविहि
तादिकरणाकरणरूपचरणाद्यं
गपरिच्छेदरूपनानाविधप्राणि
कायनिकायजन्यलास्यस्यदर्शने
नानुद्दिश्यापिप्रयोजनंसंतुष्टा
नतत्कर्मानुसारेणफलप्रापके
श्वरतयासर्वसमानत्वात् नाद

त्रि·
वि·
८८

नैकस्यवित्यापनंचैवहस्तकृतंवि
श्रुरितिभगवद्वचनात् लास्यंदे
वतादिवारवनितादिभिः क्रिय
माणंतालगीतयुक्तंनृत्यंतस्य
दर्शनेनसंतुष्टा तदीयफलप्र
दानोन्मुखेकृपारसवतीत्यर्थः
ॐलास्यदर्शनसंतुष्टायैनमः
४ लाभालाभविवर्जिता॥ अस्या
मस्यआमिलीभः कृतेपियत्नेत
दप्राप्तिरलाभस्ताभ्यांवर्जिता॥
पर्याप्तकामत्वेननित्यतृप्तत्वा
त् नमेपार्ष्णलिकर्तव्यंत्रिषुलो

केषुकिंचनेतिभगवद्वचनात्
ॐलाभालाभविवर्जितायैनमः
५ लंच्येनराज्ञा,, इतरेषांजीवभ्रा
न्तिकल्पितानांगुणमूर्त्यादीना
मुपासनाविधिरूपावाकर्मावि
धिरूपावाआज्ञाप्रेरणालक्ष्याश्च
विषयीकृतासाययासातथा,,
शुद्धचैतन्यस्याविशिष्टक्रियाया
त्मकत्वाभावेनविध्यविषयत्वा
दितियावत् अथवाकिंकरत्वा
भावेनेतरेषांदेवानामाज्ञाप्रेरणा
लंच्योपेक्षणीयाययासा सर्वस्या

त्रि॰
वि॰
८९

धिपतिः सर्वैश्वर्यानन्दनिष्क्रान्तेः ईश्व
रस्य सर्वनियन्तृत्वेन स्वेतरनिय
म्यत्वादिति ज्ञानवत्त्वं ॐ लक्ष्म्येन रा
ज्ञ्यै नमः लावण्यशालिनी ला
वण्यसौंदर्यं परमानंदस्वरूपत
यातिशायितश्रीतिविषयत्वं शा
लन इति तथा सर्वावयवसाधा
रणसुंदरभाववतीति वा ॐ ला
वण्यशालिन्यै नमः ॥ लघुसि
द्धिदा लघुनोपायेन सिद्धिर्वांछि
तार्थप्राप्तिर्ददातीति वा लघुश
ब्दोपलक्षणयालघिमापरः तथा

च लघिमाद्यष्टैश्वर्यं प्रदेति वा य
द्वा लघूनामुत्पन्नाल्पज्ञानभाग्यप्र
रीररूपचरणावतामुत्पत्तिनिकृष्टा
नांतिर्यगादीनामपिसिद्धिंमुक्ति
योग्यतांहेतुज्ञानादिसाधनसंप
त्तिस्तत्कार्यं महिमातिशयः तेषां
ददातीतिसातथा॥ ॐलघुसिद्धिदा
यैनमः ८ लाक्षारससवर्णाभा॥ ला
क्षारसेनालक्तकद्रवेणसमानोव
र्णोयस्याः सातथा आभाशोभाकां
पुष्पविशेषः
तिर्यस्याः सातथा प्रतिपादलावि
ग्रहप्रभेत्यर्थः ॐलाक्षारससवर्णा

त्रि॰ भायै नमः ५ लक्ष्मणाग्रजपूजिता

वि॰ अग्रेजायते इत्यग्रजो रामभरतौ ल

क्ष्मणस्यापिज्येष्ठभूतरामाचारानु

१० कारित्वेन चतुर्भिरपिदाशरथिभिः

पूजितेत्यर्थः रामस्य शिवलिंगप्र

तिष्ठाने तिनामवतान्यथानुपप

त्याशिवदंपतिपूजकत्वेन तदितरे

षांतद्वशास्त्रीयकृष्णानंतस्विद्धिवि

निधनितोर्थः ॐ लक्ष्मणाग्रजपूजि

तायै नमः ९ लभ्येतगौं लभ्यानिल

ब्धव्यानि कर्मोपसनाविशेषाणांफ

लत्वेन साध्यानि भव्यानीत्यर्थः ते

भवत्तत्रविलक्षणानन्तत्वंसम्या
त्मनित्योनित्यानांचेतनश्चेतनानां
एकोबहूनांयोविदधातिकामान्
नमात्मनमित्यादि यत्साक्षादपरो
क्षाद्ब्रह्मेत्यादिश्रुतिभ्यश्चात्मनोनि
त्यप्राप्तस्वरूपत्वेनमोक्षत्वेनचक्त
वियक्रियाफलत्वाभावादितिमंत
व्यं अप्यवाउत्तराणियमोर्थकामरू
पत्रिवर्गरूपाणिफलानिलब्धा
निश्रामत्वानियस्याःसकाशादिति
सातथाउक्तश्रुतेः ॐलभ्येनराये
नमः ।। लब्धभक्तिसुलभा भक्तिः

आप्यं प्राप्यं वि
कार्यं संस्कार्यं इ
तिचतुर्विधंक
र्मफलम्

त्रि॰
वि॰
९१

91

सामान्यविशेषाकारेण द्वेधा तत्रा
याज्ञानं जिज्ञासार्थ्यर्थादिभिर्यैल
ब्धानं फलोद्देशेन समयविशेषे
विच्छिद्य प्राप्तास्तेषां सुलभा तत्तत्का
र्यानुसारेण फलदानोन्मुखे स्वा
त्मस्वरूपतया संविहितत्वात् इति या
भक्तिस्स्वब्रह्मसाक्षात्कारनाप्रकृष्टै
णैकभक्तितया लब्धा एकभक्तिर्वि
शिष्यते इति स्मृतेः अस्य सुलभा, स्वा
त्मस्वरूपतया सदा ज्ञायमानत्वात् ॥
ज्ञानी त्वात्मैव मे मतमिति गीतासु,
अथवा लब्धाज्ञाना सत्यपि कंठगा

तचामीकरवल्लकभक्तीनांसुल
भासुवेनानायासेनकष्टंविना
अप्राप्यनयालाभः प्राप्तिर्यस्याः
सातथा भक्त्यामामभिजानातीति
स्मृतेः ॐ लब्धभक्तिसुलभायैनमः
१२ लांगलायुधा शिष्यरूपतया
हलायुधेत्यर्थः अनंतस्यास्तिना
गानामितिभगवडुक्तेः ॐ लांगला
युधायैनमः लग्नचामरहस्तश्री
शारदापरिवीजिता, लग्नौकरसं
बद्धौयस्तावित्यर्थः लग्नेचामरेय
योस्तौनाकृशौदलौययोस्तेश्रीश्च

त्रि· वि·
९२

महालक्ष्मीशारदाचनेतयाभूते
चनाभ्यांपरिवीजिता अनादिका
लादारभ्यपरिचर्ययावीज्यमानेत्य
र्थः ॐलयचामरहस्तलक्ष्मीशारदाप
रिवीजितायैनमः २४ लज्जापदस
माराध्या,, लज्जानामांतःकरणधर्मः
जगुप्साहेतुर्गर्हनसाधनेउपलक्ष
णं मनोधर्माणांतस्यपदमाश्रयः
कामःसंकल्पोविचिकित्सा श्रद्धाश्र
तिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंम
नएवेतिश्रुतेः तस्मिन्समाराध्याविं
तनीयेत्यर्थः यश्चात्मनितिष्ठन्नंतरो

यमयति गुह्याहितं गह्वरेष्ठं नमा
म्यस्यं येनुपश्यंतिधीरा इत्यादिश्रु
तिभ्यः अथवा लज्जापदं जीववचकं
तस्मिन्नधिष्ठानं दाभिव्यक्ति हेतुल
स्य बहिर्यागक्रमेण पूजनीयेत्यर्थः
ॐ लज्जापदसमाराध्यायै नमः ए
लं पटा लमिति एषी वाचकेन बीजे
नतदुपलक्षितजगल्लक्ष्यते आव
रकत्वेय मेवतया अविद्यालक्ष्यते
तमो जगतः पटः कारणीभूताऽवि
द्यायस्याः सा तथा मायिनं तु महेश्व
रं एको जालवानित्यादिश्रुतेः अ

त्रि॰
वि॰
९३

ज्ञानेनाहृतं ज्ञानमिति स्मृतेस्त्व
थवालंपटोनामतं श्रीआलस्यक
र्मोपासनाबाऊल्येपिप्रतिवंधक
भूयस्त्वेनत्वेश्रीज्ञानतयापरमेश्वर
स्यफलदानामुन्मुखत्वेनायां राज्ञादि
वचिरविलंबितसेवाफलदानवै
मुख्येनहृत्वोपचारोलंपटोयस्याः
सातथा अथवालंपटोनामांतःक
रणायर्माणामध्यामवशेनतत्तद
छिन्नचैतन्येमत्वराजसतमकर्माणा
मुपलक्षितहत्वे ॐलंपटायैनमः
१८ लकुलेश्वरीॐः हृष्यिक्षुपलहि

नजगल्लीयतेस्मिन्निति कुलं मायो
पाधिकं चैतन्यं जगत्प्रलयावधि
ने यत्र येत्यभिसंविशन्तीति श्रु
तेः लीयमानं कुलं लकुलं निरु
पाधिकमित्यर्थः तच्च माईश्वरीच
सा तथा लकुलेस्थानविशेषः स्वा
धिष्ठानं मणिपूरकं वा तस्येश्वरी
विश्वरुद्रात्मिकेत्यर्थः भूतसृष्टि
क्रमे पृथिव्या उदके तस्य तेजसि
तस्य परमात्मनि लयश्रवणात्
सदायतननाः सप्रतिष्ठा इति विभू
तिविशेषो वा ॐ लकुलेश्वर्यै नमः ९

त्रि· लक्ष्यमाना सर्वैः प्राणिभिर्लक्षोमा
वि· नोप्यस्त्वाहंकारोभिमानात्मकस्तद
९५ दहंकारः प्रकीर्तितः इति स्मरणात्
अध्यासेनाहंकाराधिष्ठानेत्यर्थः
अथवा मानपूजायामिति स्मरणा
त् यैर्यैः प्राणिभिर्विश्वे स्वीयकुलसौ
दर्यातिशयादिवशात्पूजा लभ्यते
हावहेतुः स्यात्तदन्तर्यामिणा पूर्व
मेवलक्षापूजादिजन्योपकारस्य
सद्भावादेः स्वस्वरूपतयालब्धवान्
यद्वामानः श्रुणमहद्दीर्घह्रस्वभे
देन प्रसिद्धः सर्वापेक्षमहानज

आत्माहंमहान्प्रभुर्वैपुरुषः अ
णोरणीयान्महतोमहीयानित्या
दिवाकैर्जलसूर्यादिवद्वपार्थिव
मीणामुपहिते मजलेवमत्क
णसर्पादेष्वनीयमानत्वात् लखो
मानःपरिमाणाउपहितनयाज
गतोययासातथा ॐलखमानाये
नमः १५ लखरसा रसोवैसइति
श्रुतेः रसवद्दृश्यनेसंवध्यतेइति
अन्यत्यापीतिविषयआनंदःस
स्वस्वरूपत्वेनलखोययासा श्रृंगा
ररसोवानंद्यंजकमंगलाभरण

त्रि· प्रष्यालंकारवत्वादितिभावः सु
वि· हसत्वप्रधानमायोपाधिकतया
९५ रस्याः स्निग्धाः स्थिराहृद्याआहाराः
95 सात्विकप्रियाइतिगीतोक्तेः नैवे
द्यादौकदम्बलवणादीनांदेवादि
विषयेनिषिद्धत्वाच्चप्रीतिविषय
त्वेनमधुरेरसोलक्ष्योययामाइति
वातथा ॐलवरमायेनमः लव
संपत्प्रसूतिः लवास्वरूपतया
स्वतःसिद्धायाःसंपदसत्यकामत्वा
दयःसच्चिदानंदादयोवानाभिः
समुत्पत्तिःसर्वोत्कृष्टतायस्याःसे

त्तिनया ब्रह्मणोमायामात्रोपाधि
नयाभिव्यज्यमानागुणाः कर्मानु
भूतत्वंदनाकस्मिकाः सैतः सर्वो
त्कृष्टभावेब्रह्मण्येज्ञापयंति तमी
श्वराणांपरमंमहेश्वरंतंदेवतानां
परमंचदैवतं पतिंपतीनांपरमं
परस्ताद्विदामदेवंभुवनेशमीड्यं
सत्यकामः सत्यसंकल्पः एषसर्वे
श्वरएषसर्वेशः पूर्णान्तर्याम्येषयो
निः सर्वस्येति गतिर्भर्ताप्रभुःसा
क्षीत्यादिश्रुतिस्मृतिभ्यः एषनि
त्योमहिमाब्राह्मणस्येति श्रुति

त्रि· वि· ९८

सिद्धनित्योत्कर्षत्वं ब्रह्मस्वरूपमेवे
ति नात्र विचारणीयं किंचिदस्ती
त्यभिप्रायः ॐ लब्धसंपत्समुन्नतये
नमः ९९ इति श्रीत्रिशतीनामार्थप्र
काशिकायां द्वितीयखंडे पंचमवर्णि
नामार्थप्रकाशने दशमे प्रकरणे
ह्रींकारिणी ह्रींकारो द्वितीयखंडस
मुच्चयवयवतया वाच्यवाचकसंबं
धेन यस्यास्त्यस्तीति सा तथा ॐ ह्रीं
कारिण्यै नमः १ ह्रींकाराढ्या अत्र ह्रीं
कारशब्देन तत्कार्यभूता वेदास्तेषा
मप्युर्थतया वाम्नायाम्नादौ भवाह

र्वभावीत्यर्थः शाब्दस्यार्थविषय
कत्वेन प्रवृत्तेः शक्तिग्रहादौ का
ष्यादिकल्पेवार्थज्ञानपूर्वकश
ब्दसंयोगदर्शनादर्थस्यपूर्वभावि
त्वमुक्तमितिभावः ॐह्रींकाराया
यैनमः २ ह्रींमय्या अस्यवीजस्य
जगदभिन्ननिमित्तोपादानभूतमा
याविशिष्टचैतन्यवाचकतयातं
त्रतीकत्वेनतत्तद्दिष्टयावद्गुणावत्व
तदुपासनानिशायमहिम्नाभिव्य
ज्यते अन्यथामंत्रपरस्परयायास्विष्ट
सिद्धिभावप्रसंगः स्यात् अव्यवहि

त्रि॰
वि॰
९७

नपूर्वंनाम्नानभिव्यक्तरूपस्यापिप्रा
कृतस्तस्यैतद्बीजमात्रात्मनोऽक्षरि
तवीजार्थकतयापूर्वंभावित्वमुक्तं
इदानीमभिव्यक्तात्मस्वार्थकतया
विवर्तवादमाश्रित्यवाचारंभणाका
रेणनामरूपद्वयवत्वमुच्यते ह्रीं
वीजार्थोसौनप्राकृतेनलक्ष्यते मध्ये
व्यवहारकालेह्रींयस्मात्सानया
घटादिषुवस्तुषुसच्चिदानंदप्रती
त्याव्यवहारकालेपिप्रपंचकारण
त्वात्तद्रूपतयाभासमानेजग
त्कारणंइतिसिद्धांतः अनेनाचेतन

परिणामारंभादिवादातिप्रमाण

नयाद्युक्त्याद्याभासवत्वेन निरस्ता

वेदितव्याः ॐ ह्रीं मध्यायै नमः ३

ह्रीं शिखामणिः लोके यथा चूडाम

णिः सर्वांगरचिताभरणापेक्षया त

द्विजातीयप्रकाशसत्ताद्याश्रयत्वा

त् उत्तमांगस्थानविशेषस्थापितः

महदैश्वर्यादितद्गुणप्रख्यस्यख्या

पयति तथा सर्वशाहजालतद्वाच्या

र्थभूतचिज्जडसंवेधरूपपदपंचवा

चकातिसूक्ष्मह्रींवर्णात्मकश्रीवि

द्याराजवीजस्य सत्यज्ञानानंता

दात्मकलस्यार्थभूतामतोह्रीँबीज
जापकानोसर्वार्थप्रदानेनपारमे
श्वर्येवंजयतीतिगुणयोगकृतना
मेदं तथाचह्रीँशिवामणिः परम
तात्पर्येणज्ञापनीयेत्यर्थः ॐह्रीँशि
वामणयेनमः ४ ह्रीँकारॐडाग्नि
शिवा ह्रीँकारएवॐडंवाच्यवाचक
भावसंबंधेनपरब्रह्मावछेदकत
याञ्चावहनीयादिसदृशं तस्याग्नि
शिवोऽदीमाग्नौजुहोतीतिप्रमाणे
नाहवनीयोजुहोतीति विधिवाक्य
गतहोमाधारताकेवलाहवनीयस्या

योग्यतया मा अग्निज्वालस्य तस्य होमाधारता मां यज्ञायमानायायदृष्टद्वारा स्वर्गं संबंधेन सामर्थ्यं कतया तज्ज्ञापकवेदवाक्यस्यापि प्रत्यक्षां संबंधित्व माहवनीयनिष्ठहोमाधिकरणादीनाग्निज्वालास्वाधारमूतकुंडमार्थकसंपादकं वा भवति तथा स्ववाचकवीजस्यापि मंत्रै रुपासितेति विधिगतदेवतोपासनकरणानां मंत्राणामपि स्ववाचकतया मार्थकसंपादनात्तथोक्तं ते ॐ ह्रीं कार कुंडाग्निशिखायै नमः ५

त्रि॰
वि॰
५५

99

ह्रींकारशशिचंद्रिका ह्रींकारएव
शशीचंद्रस्तस्यस्वरूपाभेदभूतप्र
काशकचैतन्यंचंद्रिकापदेसोप
मीयते यथाचंद्रस्वरूपभूतास्तत्त
प्रसारभूताज्योत्स्नादेवादिसर्वलो
कानांसंजीवकतयोपकरोतित
थाहृदजरभक्तिपरवशागुरुघ्यो
रेयादीनांह्रींकारवाच्यार्थतयात
दभिन्नत्वेपिजगदादिवर्तकारणात
यासच्चिदानंददायायकतयासंजी
वयतीतिभावः॥ ॐह्रींकारशशिचं
द्रिकायैनमः ८ ह्रींकारभास्कररु

विः॥ भासं कांतिं करोति प्रभासय
ति लोकोपकाराय ति सूर्य लक्ष्य
रुचिः प्रचंडभानुर्यथालोके स्तु
यो वर्षास्वृतिगाढ नरसवड्ड द
कयारासं व्याप्त दिगंतराः सुदिवा
विद्यमानोपि सूर्यः साक्षादेवमि
ति वाक्षुषगोचरोन भवति तद
भावे शिष्टानां भोजनादिसंजीव
कव्यवहाराभावेन नष्टप्रायासि
द्धाः प्रसन्नमनसो भवंति तथा
ज्ञानमार्गानधिकारिणां मोक्षमा
र्गोपायभूतानां विदिनदेवनाट्टप

ह्रींकारागांजनानांबहुतरपुण्य
महिम्नामहावातेनमेघावलो
दरीकृतायाचेडभानुरिवस्वस्व
मायनंगुरुकृपापांगावलोक
नरूपदीप्तावशेनप्रतिबंधक
दुरितापगमेपरदेवतारूपोह्रीं
कारः प्रत्यर्थपामात्माद्वाच्या
र्थपरोतत्त्वज्ञानहेतुर्भवति॥ चि
रकालनैरंतर्यभावनाप्रकर्षे
णतस्मिन्नभिमुखेसति, तस्यस्वा
रूपपरमानंदचित्कलास्वयमे
वाभिव्यक्तासत्यानंदानुभावेन

स्त्वयतीति नयोच्यते ॐ ह्रींका
रभास्कररुच्यै नमः २ ह्रींकारा
म्भोदचंचला श्रृंभास्युत्तानिद
दातीत्वंभोदा ह्रींकारस्यापिका
मवर्षित्वेन तैरूपमीयते तेषु
चंचलाविद्युल्लताविद्यमानान
दभिन्नाप्रकाशमानासतीवर्षी
दकद्वारामस्याश्रुत्पादकत्वंय
याध्यवक्ति ह्रींकारवाच्यतयान
दभिन्ना पितत्स्वरूपविचारणा
यांशुद्धलक्ष्यार्थस्यरूपासत्यापि
निर्वचनीयस्ववाचकमेवप्रका

त्रि॰
वि॰
९१

शितदेवतात्वेनस्वाभीष्टप्रकाशार्थ
प्राप्तिहेतुभूतेत्यभिसंधिः ॐ ह्रीं
कारंमोदवेबलायेनमः प ह्रींका
रकंदांकुरिता ह्रींकाररूपकंदःप्र
शुत्तरवीजभारस्तस्यांकुरितञ्चा
दिप्रसवोद्गतनाभिव्यक्तिरित्यर्थः
यथालोकेप्यंकुरादिकंकंदादिनि
ष्ठोत्पादकशक्तिमभिभूयैवस्व
यंस्कंदशाखापत्रपुष्पफलाद्या
त्मना यथाविवर्तमानंतत्साम
र्थ्यप्रकटनकारणंभवति तथा
ह्रींकारस्यवेदैकदेशत्वेनेनरप्र

माणानपेक्षत्वनयास्ववाच्यार्थज्ञा
पनेनस्वतःप्रामाण्येपिस्थितेपिन
जन्यज्ञानविषयत्वावच्छेदकधर्म
रूपनानाप्रकारजनकज्ञानत्वरिणा
महेत्वत्वमधिकाघटनघटनाप
टीयसी मायोपाधिकत्वेनतदर्थ
हयरूपासतीतन्मात्रप्रमाणावेद्ये
त्यर्थः ॐ ह्रींकारकेदोऊरितायैनमः
९ ह्रींकारैकपरायणा ह्रींकारप
वैकश्रुतिनिरसाधारणंचतत्वविष
प्रकृष्टार्थसाधकतयापरमयत्ने
ज्ञापकेप्रमाणे यस्याःसातथा अ

त्रि·
वि·
९२

१०२

स्वबीजस्यवाच्यार्थोमायानिरधिष्ठा
नानसिद्धातीतितथा आश्रयत्ववि
षयत्वाभ्यांतदुपहितेनेनस्थापित
इतिभावः ॐह्रींकारैकपरायणायै
नमः ९ ह्रींकारदीर्घिकाहंसी ह्रीं
कारएवदीर्घिकाराजोद्यानक्रीडावा
पीसंसारकाननसंचारिलोकविश्रा
न्तिकारणत्वेनह्रींकारस्तयोपमी
यते आरामेस्वपपुंपनिनतेपपुंपे
तिकस्थनेतिक्षतेः आसमंताद्रम
तोस्मिन्नित्यारामोवाजगत् तत्रोप
मनादिनापरमानंददायकतया

वाह्रींकारउपमीयतेनास्मिन् हं
सस्रीहंसीयथालोकेसारासार
विवेकीहंसाधारस्तवर्णीकमला
दिमतीवापीमहाराजसंबंधिनी
तिज्ञायते तद्वद्वाच्यार्थरूपतया
प्रकाशमानासतीस्वसंबंधिजन्य
सद्बोत्पादकंमोदहेतत्वंयोतय
तीत्यभिप्रायः ॐह्रींकारदीपिका
हंस्येनमः ।। ह्रींकारोद्यानकेकि
नी ह्रींकारएवोद्यानतत्फलानुभा
वकत्वाज्जयोद्याने, तस्यकेकिनीम
यूरीयथालोकेवहुरूपदर्शिषार

त्रि·
वि·
१०३

103

णपकेषुसत्स्वपितस्माद्रूपधनिभ्यो
स्वदृष्टनयादर्शितश्रवणादिजन्यब्र
मोदसाधकतयोद्यानलंकरिस्त्वे
तथा ह्रींकाररूपदेवताधनिः सवि
दानंदरूपतद्वाच्यार्थस्यचपरमपुरु
षार्थसाधकत्वेनविशिष्टेष्वलविस्म
रुद्राण्यादिमूर्तिषु [illegible]यानतरुव
ल्लीकल्पगुल्मादिवङ्गमनीचता
पन्नदेवतिर्यङ्मनुष्यादिषुचसपू
र्वस्वेच्छयासर्वव्यापकत्वेननदा
त्मरूपतयाशरीरेंद्रियप्राणाद्याधा
रपरमप्रेमास्पदपरमानंदस्वरूपक

गोचरां हं हन्ति व्यापनया प्रतिबीज
प्रकाश्या भवतीत्यर्थः ॐ ह्रींकारो
द्यानकेकिन्यै नमः १२ ह्रींकारारण्य
हरिणी ह्रींकारवाच्यार्थैकदेशभू
तमायाविद्यातत्कार्याणां बंधरूप
तया गहने व्याघ्रादीनामिव भयहे
तूनां सद्भावेनैव दुःप्रापत्वरूपध
र्मसाम्येन ह्रींकारस्यारण्योपमित
त्वेन तथा चारण्यमिव ह्रींकार इति
सर्वत्रोपमानोत्तरपदसमासः त
त्रैवं सति यथारण्यगतप्ररूढस्य
शीघ्रं दृष्टिपथं गता हरिणीपणी

त्रि॰ वि॰ १०४

शाङ्करयभावनिरूपयेननदधिष्ठान
फलप्राप्तिसाधनतामवगमय
तिधीरगुरुमुखसनदानिरंतरभक्ति
भजनपरप्राणिलेकस्योपासना
परिपाकमहिम्नापरोक्षीकृताज्ञा
ननिवृत्तिपूर्वकमयापाकरणेन
आनंदंप्रापयतीतितथोपमीय
तेइतिभावः तमेवविदित्वातिमृ
त्युमेतीतिश्रुतेः ॐह्रींकाराराण्य
हरिण्यैनमः ९३ ह्रींकारावालवल्ल
री ह्रींकारमंत्रवाचकतातिरूपि
तवाच्यतानामकसंबंधावच्छिन्न

परदेवतास्वस्वरूपत्वेनतदुपास
नाविषयफलदानसमर्थासती
प्रवालमात्रप्ररोहाद्विद्युद्वल्लर्यी
पमीयते तथाचनत्संबंधितया
ह्रींकारोजपादिदिनाश्रावालस्व
सर्वदामेरक्षणीयइतिनाम्नयोर्थः
परिनिष्पन्नइतियावत् ॐह्रींकार
बालवल्लर्यैनमः १४ ह्रींकारपंज
रशुकी मंदाधिकारिणामुपास
नाकरणासाधारणपावनीप्रतीक
तया ह्रींकारस्यबालकादिलालन
विषयत्वधर्मप्रकारेणपंजरोप

त्रिं
वि॰
१५

105

मातथाच नत्रत्पश्चकीवसंलापा
दिनामनुष्यादिविनरंजनी प्रवेत
नदृष्टानुसारेण फलदात्रीमती
नयोपमितेनिदृष्टव्यं ह्रींकारः पं
जरमिवतस्यश्चकीनत्सार्थकाका
रिणीत्यर्थः ॐ ह्रींकारपंजरशुके
नमः १५ ह्रींकारांगनदीपिकाँ श्रंग
नवत्सर्वमायारणादिखांतिस्थान
